श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमद्वेङ्कटाध्वरि विरचितं

# ॥ श्री राघवयादवीयम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री राघवयादवीयम् ॥

किञ्चित्सञ्चिन्तयोगोपीकिलकिञ्चितवञ्चितम्।
अञ्चितं ज्योतिरमरैरञ्जनाद्रावुदञ्चितम्॥

भद्रोल्लासंभास्करापत्यवाहि-
न्यन्तर्द्वीव्यन्नस्तवैर्युग्रबाणः।
नाथोऽहल्यानन्दहेतुः प्रदत्तां
राजीवाक्षो राघवो यादवो वा॥

अनुवर्णितरामकृष्णवृत्ते-
रनुलोमप्रतिलोमवाचनाभ्याम्।
कृतिमुल्लसितां विधाय पद्यैः
विवृणोति स्वयमेव वेङ्कटार्यः॥

वन्देऽहं देवं तं श्रीतं रन्तारं कालं भासा यः।
रामो रामाधीराप्यागो लीलामारायोध्ये वासे॥ 1॥

सेवाध्येयो रामालाली गोप्याराधी मारामोराः।
यस्साभालङ्कारं तारं तं श्रीतं वन्देऽहं देवम्॥ 1॥

साकेताख्या ज्यायामासीद्याविप्रादिप्तार्याधारा।
पूराजीतादेवाद्याविश्वासाग्र्यासावाशारावा॥ 2॥

वाराशावासाग्र्या साश्वाविद्यावादेताजीरापूः।
राधार्याप्ता दीप्राविद्यासीमायाज्याख्याताकेसा॥ 2॥

कामभास्स्थलसारश्रीसौधासौघनवापिका।
सारसारवपीनासरागाकारसुभूरिभूः ॥ 3 ॥

भूरिभूसुरकागारासनापीवरसारसा।
कापिवानघसौधासौ श्रीरसालस्थभामका ॥ 3 ॥

रामधामसमानेनमागोरोधनमासताम्।
नामहामक्षररसं ताराभास्तु न वेद या ॥ 4 ॥

यादवेनस्तुभारातासंररक्षमहामनाः।
तां समानधरोगोमाननेमासमधामराः ॥ 4 ॥

यन् गाधेयो योगी रागी वैताने सौम्ये सौख्येसौ।
तं ख्यातं शीतं स्फीतं भीमानामाश्रीहाता त्रातम् ॥ 5 ॥

तं त्राताहाश्रीमानामाभीतं स्फीतं शीतं ख्यातं।
सौख्ये सौम्येसौ नेता वै गीरागीयो योधेगायन् ॥ 5 ॥

मारमं सुकुमाराभं रसाजापनृताश्रितं।
काविरामदलापागोसमावामतरानते ॥ 6 ॥

तेन रातमवामास गोपालादमराविका।
तं श्रितानृपजासारभं रामाकुसुमं रमा ॥ 6 ॥

रामनामा सदा खेदभावे दया -
वानतापीनतेजारिपावानते।
कादिमोदासहातास्वभासारसा -
मेसुगोरेणुकागात्रजे भूरुमे ॥ 7 ॥

मेरुभूजेत्रगाकाणुरेगोसुमे -
सारसा भास्वताहासदामोदिका।

तेन वा पारिजातेन पीता नवा
 यादवे भादखेदासमानामरा ॥ 7 ॥

सारसासमधाताक्षिभूम्नाधामसु सीतया।
साध्वसाविहरेमेक्षेम्यरमासुरसारहा ॥ 8 ॥

हारसारसुमारम्यक्षेमेरेहविसाध्वसा।
यातसीसुमधाम्नाभूक्षिताधामससारसा ॥ 8 ॥

सागसाभरतायेभमाभातामन्युमत्तया।
सात्रमध्यमयातापेपोतायाधिगतारसा ॥ 9 ॥

सारतागधियातापोपेतायामध्यमत्रसा।
यात्तमन्युमताभामा भयेतारभसागसा ॥ 9 ॥

तानवादपकोमाभारामेकाननदाससा।
यालतावृद्धसेवाकाकैकेयीमहदाहह ॥ 10 ॥

हहदाहमयीकेकैकावासेद्धवृतालया।
सासदाननकामेराभामाकोपदवानता ॥ 10 ॥

वरमानदसत्यासह्रीतपित्रादरादहो।
भास्वरस्थिरधीरोपहारोरावनगाम्यसौ ॥ 11 ॥

सौम्यगानवरारोहापरोधीरस्थिरस्वभाः।
होदरादत्रापितह्रीसत्यासदनमारवा ॥ 11 ॥

यानयानघधीतादा रसायास्तनयादवे।
सागताहिवियाताह्रीसतापानकिलोनभा ॥ 12 ॥

भानलोकिनपातासह्रीतायाविहितागसा।
वेदयानस्तयासारदाताधीघनयानया ॥ 12 ॥

रागिराधुतिगर्वादारदाहोमहसाहह।
यानगातभरद्वाजमायासीदमगाहिनः॥ 13 ॥

नोहिगामदसीयामाजद्वारभतगानया।
हह साहमहोदारदार्वागतिधुरागिरा॥ 13 ॥

यातुराजिदभाभारं द्यां वमारुतगन्धगम्।
सोगमारपदं यक्षतुङ्गाभोनघयात्रया॥ 14 ॥

यात्रयाघनभोगातुं क्षयदं परमागसः।
गन्धगन्तरुमावद्यां रंभाभादजिरा तु या॥ 14 ॥

दण्डकां प्रदमोराजाल्याहतामयकारिहा।
ससमानवतानेनोभोग्याभोनतदासन॥ 15 ॥

नसदातनभोग्याभो नोनेतावनमास सः।
हारिकायमताहल्याजारामोदप्रकाण्डदम्॥ 15 ॥

सोरमारदनज्ञानोवेदेराकण्ठकुंभजम्।
तं द्रुसारपटोनागानानादोषविराधहा॥ 16 ॥

हाधराविषदोनानागानाटोपरसाद्रुतम्।
जम्भकुण्ठकरादेवेनोज्ञानदरमारसः॥ 16 ॥

सागमाकरपाताहाकङ्केनावनतोहिसः।
न समानर्दमारामालङ्काराजस्वसा रतम्॥ 17 ॥

तं रसास्वजराकालंमारामार्दनमासन।
सहितोनवनाकेकं हातापारकमागसा॥ 17 ॥

तां स गोरमदोश्रीदो विग्रामसदरोतत।
वैरमासपलाहारा विनासा रविवंशके॥ 18 ॥

केशवं विरसानाविराहालापसमारवैः।
ततरोदसमग्राविदोश्रीदोमरगोसताम्॥ 18॥

गोद्युगोमस्वमायोभूदश्रीगखरसेनया।
सहसाहवधारोविकलोराजदरातिहा॥ 19॥

हातिरादजरालोकविरोधावहसाहस।
यानसेरखगश्रीद भूयोमास्वमगोद्युगः॥ 19॥

हतपापचयेहेयो लङ्केशोयमसारधीः।
राजिराविरतेरापोहाहाहङ्ग्रहमारघः॥ 20॥

घोरमाहग्रहंहाहापोरातेरविराजिराः।
धीरसामयशोकेलं यो हेये च पपात ह॥ 20॥

ताटकेयलवादेनोहारीहारिगिरासस:।
हासहायजनासीतानाप्तेनादमनाभुवि॥ 21॥

विभुनामदनाप्तेनातासीनाजयहासहा।
ससरागिरिहारीहानोदेवालयकेटता॥ 21॥

भारमाकुदशाकेनाशराधीकुहकेनहा।
चारुधीवनपालोक्या वैदेहीमहिताहृता॥ 22॥

ताहृताहिमहीदेवैक्यालोपानवधीरुचा।
हानकेहकुधीराशनाकेशादकुमारभाः॥ 22॥

हारितोयदभोरामावियोगेनघवायुजः।
तंरुमामहितोपेतामोदोसारज्ञरामयः॥ 23॥

योमराज्ञरसादोमोतापेतोहिममारुतम्।
जोयुवाघनगेयोविमाराभोदयतोरिहा॥ 23॥

भानुभानुतभावामासदामोदपरोहतं।
तंहतामरसाभाक्षोतिराताकृतवासविम्॥ 24॥

विंसवातकृतारातिक्षोभासारमताहतं।
तंहरोपदमोदासमावाभातनुभानुभाः॥ 24॥

हंसजारुद्धबलजापरोदारसुभाजनि।
राजिरावणरक्षोरविघातायरमारयम्॥ 25॥

यंरमारयताघाविरक्षोरणवराजिरा।
निजभासुरदारोपजालबद्धरुजासहम्॥ 25॥

सागरातिगमाभातिनाकेशोसुरमासहः।
तंसमारुतजङ्गोप्ताभादासाद्यगतोगजम्॥ 26॥

जंगतोगद्यसादाभाप्तागोजंतरुमासतं।
हस्समारसुशोकेनातिभामागतिरागसा॥ 26॥

वीरवानरसेनस्य त्राताभादवता हि सः।
तोयधावरिगोयादस्ययतोनवसेतुना॥ 27॥

नातुसेवनतोयस्यदयागोरिवधायतः।
सहितावदभातात्रास्यनसेरनवारवी॥ 27॥

हारिसाहसलङ्केनासुभेदीमहितोहिसः।
चारुभूतनुजोरामोरमाराधयदार्तिहा॥ 28॥

हार्तिदायधरामारमोराजोनुतभूरुचा।
सहितोहिमदीभेसुनाकेलंसहसारिहा॥ 28॥

नालिकेरसुभाकारागारासौसुरसापिका।
रावणारिक्षमेरापूराभेजे हि ननामुना॥ 29॥

नामुनानहिजेभेरापूरामेक्षरिणावरा।
कापिसारसुसौरागाराकाभासुरकेलिना॥ 29 ॥

साग्र्यतामरसागारामक्षामाघनभारगौः।
निजदेपरजित्यास श्रीरामे सुगराजभा॥ 30 ॥

भाजरागसुमेराश्रीसत्याजिरपदेजनि।
गौरभानघमाक्षामरागासारमताग्र्यसा॥ 30 ॥

॥ श्री राघवयादवीयं समाप्तम् ॥